(६२५२ - पत्र १६)

No. १३ग-१ ६२५२

Title क्रतु पद्धतिः

Author

Extent २६ पत्र Age सं. १९८४

Subject सूत्र-पद्धति

र० नं० ६३

नं० ९३ ग० १

अथ कल्पलतिकारम्भः

नं० ४४०३

क्रतु
१

ॐ श्रीगणेशाय नमः बहुभिः कांचनमयैर्मरकतमयैर्विराजितं चंदनक पद्धति
लितवपुरनवसरसीरुहवक्त्रकेलिगणेशं १ विधाकरान्गुरून्नत्वा सर्वविद्या
कराग्रिणः केशवदीक्षितशर्म्मा तनुते क्रतुपद्धतिं २ गवामयनमुक्त्वेदा
नीं क्रतिमंत्रपाठानुसारेण प्राप्तस्य वाजपेयस्य ब्राह्मणकर्तृकस्य प्रयोगो लि
विख्यते सच शरदृतौ ब्राह्मणक्षत्रिययोरेव न वैश्यस्य· अथ यदि ब्रा
ह्मणो यजते अथ यदि राजन्यो यजेत इति श्रुतेस्तयोरेव भवति तच्च
वाजपेयं त्रिधा सामगाः पद्धतिकारा आमनंति तेच संस्था वाजपेयम्
क्रतुवाजपेयं प्रायदि वाजपेयात्मकाः तत्र प्रथमसंस्थावाजपेयस्य
स्य सर्वोपि विधिर्वक्ष्यमाणः प्रायदि वाजपेयवत् दक्षिणास्तु विशे
षः गवांशतं द्वादशोत्तरं वा सप्तदशयाज्ञाने शक्त्वा गच्छति विष्वे
स्वहस्ताग्राणागच्छन्तेति च विशेषो न भवति संस्थापपाव एव भव
ति न प्राजापत्याः वसंत एव कालः न परियज्ञो मरुत्वती
यांते रथावहरणादि यच्चान्यत्तेष्वा पूर्वं वर्तते न भवति इति द्वितीय
स्तु सामगाचार्यैरेवोक्तः तस्य सर्वोपि विधिर्मुख्यवद्वक्ष्यमाणः
क्रतुवाजपेयवत् दक्षिणास्तु सप्तदशैव गावः इति· सहस्रदक्षिणावि
षयि कोप्यदाप्यत्रैधातव्यादिन भवति तैष प्रायश्चैवैश्यस्येति कात्या
यनेन दर्शितो मुख्यः क्रतुविशेषरूपः तस्येदानीं प्रयोग उच्यते य
प्या तस्य प्रारंभे पूर्णिमायां सुत्यो ब्राह्मणक्षत्रिया वधिकारिणो
न वैश्यः संस्था वाजपेये तु वैश्योप्यधिकारी तस्य यात्वात् संस्था
स्तेदह संस्काररूपाः नित्याः तत्र तेषामाकरणं तु नित्यं क्रतुकरणे दह
संस्कार न्यूनतापत्तेः प्रायदि वाजपेयस्य निषेधोक्त· तस्मा छेषयोप

आधिकारी अथवाजपेयस्य षोडशिविकारत्वं षोडशिनि च मैत्रायणी
यकश्रुतौ चयननिषेधः शावरभाष्योदाहृतश्रुतौ नुक्तत्वात्तोग्नि
ष्टोमेनानुयजन्ति नमुक्थेन नमातिरात्रेणेत्यादिश्रुत्युदाहृत्य रात्राद्यु
क्तौ तत्र षोडशीवाजपेययोश्चिंतया चयनं नास्ति सिद्धांतितं नतु स्व
तरपरं अत्रशाखायां तूत्तरवेदिमपरे रोगानि कात्यायनेनाभिषेका
वसरे सत्रे राजा उत्तरवेदिरे वभवति न च यनं वाजपेय इति कात्यायनम
तमाभाति धातंजय्यः षडुपसत्ताक अत्र साग्निचित्यः स्यादिति लाघा
यनसूत्रे वाजपेये न चयनमुक्तं तत्र साग्निचित्य इष्टका पक्षुश्चयो
गात्सर्वमादृत्य प्रजाभ्युदयिके कार्ये चयनाकरणेन प्रथम परि
यज्ञात्सर्वं श्रीककीचार्य वासुदेव विरंचि धान्वि हरिहरावधाकरा
चार्यप्रमुखैर्मौलिपूर्वैः तेन निरूपणान्नभवतीति तेषां मते अग्निः हरि
स्वामि अनंतयाज्ञी देवजानी प्रभृतिनां मते भवतीति लिखितं
नभवतीति पुनः शंकेते संस्था वाजपेयक्रतु वाजपेययोः स्तभव
ति संस्थात्वात् षोडशिविकारान्नभवतीति रत्नेश्वरमिश्राः
संस्था वाजपेये संस्था सोमस्य द्रुवा कृत वाजपेये वाजपेयत्वात्
षोडशिविकारत्वाच्चनभवतीति मधुकरमिश्रा यां सिद्धांतः
अथपरियज्ञाविलापत्ना उच्यते तत्र वाजपेयाक्रतु प्रयोगस्य दर्शा
धिनामावास्या कार्तिकामावास्या कार्तिकी पौर्णमास्या वा वाजपे
यस्तत्प्रहः भवति तस्य उभयतः अनंतरहितपूर्वस्यां उत्तरस्यां च पौ
र्णमास्यां बृहस्पतिसवाख्यायजेत तयोर्विधिर्वक्ष्यते ज्योतिष्टो
माप्यां वा तत्र चाग्निष्टोपे अचयनेऽग्निष्टोम इति वचनात् ते

क्रतु २ विधिरग्निष्टोमपद्धतावुक्तः वाजपेयषोडशिसामायाः पूर्वास्तु द्वादशाहषोडशिसामा पद्धति
स्तु उत्तरास्सर्वा सौम्ययज्ञेन तत्र षड्वस्त्रियुग्मास्त्वग्निष्टोमाः युग्मास्तु
एकाहः षडहः उत्तरास्तु तत्र युग्मास्तु एकाहः षडहः युग्मास्त्वग्निष्टोमाः
सर्वैरग्निष्टोमसंस्थैर्वा पवित्राद्यैः क्रमसंस्थैः राजसूयसोमैः उभय
तो अतिरात्रस्तु षोडशिसामाः तु उत्तरास्तु व्युक्तसंस्थैः तत्र एकाहे षडहे
प्रथममग्निष्टोमसंस्थं रथन्तरपृष्ठमहः द्वितीयपंचदशस्तोमं
बृहत्पृष्ठमुक्थ्यसंस्थं तृतीयसप्तदशस्तोमं वैरूपपृष्ठमुक्थ्यसंस्थं
पंचमं त्रिणवस्तोमं शाक्वरपृष्ठमुक्थसंस्थं षष्ठं एकविंशस्तोमं
रैवतपृष्ठमुक्थसंस्थं चतुर्थमहस्तु एकविंशस्तोमं वैराजपृष्ठं
षोडशिसंस्थं एवमाविधिरुक्तः राजसूयसोमास्तु पवित्र
१ अभिषेचनीयः २ दशपेयः ३ केशवपनीयः ४ व्युष्टि
द्विरात्रो ज्योतिष्टोमस्सापवर्गः ५ क्षत्रधृतिः ६ [illegible]
द्विरात्रादिकत्वाद्राजसूये बृहस्पतिसवविधिरुच्यते [illegible]
पि एकाहयागस्ते ब्राह्मणस्य [illegible] पुरोधाकामस्य भवति यः [illegible]
यजेत सोन्यैर्वा अभिवाद्य नैनकं च नाभिवादयति [illegible]
[illegible] छायी [illegible] स्थपतिरिति [illegible] नाम्नावाच्यः स राजा
ब्राह्मणाय पुरस्कुर्वीत सचाशाधिकारी [illegible]
नानेविशेषः गर्गाशाखाज्ञानादिविधाय अत्र पेत्यादिकारिष्यमाणा
वाजपेयनिमित्तं साम्पत्रयस्त्रिंशत् षोडशीदक्षिणा साम्पत्रयस्त्रिंश
तग्वीदक्षिणा तुवा साम्पत्रयस्त्रिंशत् [illegible] गवीदक्षिणा [illegible]
ताग्निष्टोमसंस्थेन रथन्तरपृष्ठेन बृहस्पतिसवेनाहयद्वे इतिसि

वृत्यः ततः संकल्पवाक्यांते मन्त्रमेतं अमुकगोत्रोमुकप्रवरः वस्त्रादि
भिरर्चितोत्र सोमभवेद्यादि पूर्ववत् एकादशाद्या द्वादशापरिमिता वा दीक्षाः
तिस्र उपसदः सप्त कुर्याः अग्नीषोमीयस्य पशुपुरोडाशमनुदेव
सूहविषां निर्वापः यथा वाचस्पतिः प्रैषः प्रणीताप्रणयनं स्थि
तस्य चोपयुक्तस्य पात्रासादने सर्वप्रोक्षणानि शेषं स्यादग्नि
होत्रहवणी च एकत्रिंशत्कपालानि कृष्णाजिन उलूखलमुस
ले पत्नीअन्नं पात्री चेदमेव उपसर्जनीपात्रं ध्रुवा तिस्रः पुरोड
शपात्रः पत्तावदानं औषधयोर्ग्नीषोमीयाः व्रीहयो यवा
वाः देवस्यत्वे पुनः प्रकृतौ व्रीहयः अश्व्याशवः १ पद्ममयपाचि
नो व्रीहयः आशवः २ श्यामाकाः ३ नीवारास्तृणधान्या
नि ४ रक्तशालहायनाः ५ गवेधुकाः ६ अनूपाः एव अप्य
जातात्रीहयो नांबाः ७ यवाः ८ इत्यष्टौ एते पृथक् पृथक्
कर्मार्थं पात्रासंश्चेति उपकल्पनी येष्वप्यक्तः स्थालीपामेदाराग
व ६ पूर्वाग्निहोत्रहवण्यादानादिसादनान्ते विशेषः व्रीहि
ह्यादीनां एत्यगवेदनीयां युगपत्पद्भ्यानिरासः अभावे एव
जभिमर्शनमेव पृथगालभः प्रकृतौ व्रीहियवान्यतु रस्मात्
अग्नीषोमाभ्यां जुष्टं गृह्णामि इति प्रकृतिभ्यः सवित्रे सत्यप्र
सवाय जुष्टं २ आशुभ्यो अग्नये गृहपतये जुष्टं श्यामाकेभ्यः सो
माय वनस्पतये जुष्टं ४ निवारेभ्यो बृहस्पतये वाचे जुष्टं २
हायनेभ्यः इंद्राय ज्येष्ठाय जुष्टं ६ गवेधुकेभ्यो रुद्राय पशुपतये
जुष्टं ७ जलस्पर्शः नांवेभ्यो मित्राय सत्याय जुष्टं यवेभ्यो व

रुणाय धर्मपतयेऽजुष्टं गृह्णामि इति ९ पृथक्कृतेषामेभि मर्शनं
स्थापितपवित्रा सांप्रोक्षणी: संस्कृत्य क्रमाद्गृहणोक्तमंत्रैस्त्वा
जुष्टं प्रोक्षामीति विशेषितै: प्रोक्षणं कृष्णाजिनोलूखलमुसल
शूर्पधिषकपालानि प्रोक्ष्योपसर्जन्यादि प्रोक्षणं प्रोक्षणीनि:
शेषकरणं कृष्णाजिनादानादि तथा विमोकान्तोग्नीयार्थद्रव्या
वघात:० यादि तथा विमोकान्त: प्रकृत्यादीनां पृथगवघात: अ
ग्नीषोमीयार्थस्य यावद्वेत्ति: सह वारुणे धर्मपत्यर्थाश्चावहन्त
श्चेदवहन्ता: • अग्नीषोमीयार्थस्य व्रीहिस्त्वेषवानां सर्वांति स्व
घाते: अंते च वाग्विसर्ग: पात्र्यामोपस र्वेषां तंत्रेणाभि
मर्शनं अवघातवत् पक्वफलीकरणं करणं तेनिर्देश:
आस्मिंतिमयो यवि वेपीदानीमेवानिर्देश: अंत्यस्यापेक्ष
णात् सर्वकरणानामेकत्र रक्षणं: अग्नीषोमीयार्थैकादश
कपालोपधानं तदुत्तरत: सवितृसत्यप्रसवार्थै द्वादशकपालोपधानं
२ तदुत्तरतो गृहपतेरर्थेष्टाकपालोपधानं षड्रूणांस्यानक.
ल्पनं अंगारै: कपालाभ्यूहनं उपसर्जन्यधिश्रयणं उपधानोप
सर्जन्यधिश्रयणानांयोगपद्य घातवयापिनाहि अन्येद्वयं कुर्यु:
आघद्रव्यद्वयपेक्षणार्थं कृष्णाजिनादानादि प्रोहणान्तं० प्रथम
स्य कृत्वा द्वितीयस्य • हविरावापादि प्रोक्षणान्तं तत्खलान्तरे तृती
यस्य चस्खलान्तरे तत इतरांचर्वर्यितराडुलानामपि पात्र्यामाव
प: पृथक् उपसर्जयूल्लास यवनेपृथक् चरुषुवोपसर्जन्यान
यनं अधिश्रयणं विरोधाद्भूमि: प्रथमनत्वग्दानेपुरोडाशेषु

व. एकत्र पिष्टलेपापनयनं पात्र्यंगुलिप्रक्षालनं स्थापनं च. सर्वे
षां पर्यग्निकरणं मंत्रेण पुरोडाशचरुप्रभृतीनां आलभनं च आ
ज्योदकस्पर्शनं ततः नात्रव्रतोपायनं स्रुचं संमृज्यतीति विशेषः
स्थापितवेदाग्नेर्ध्रुवा पत्नीवदानयोस्त्रिपुरोडाशपात्रीणां च सं
मार्गः ध्रुवायामेव चतुर्गृहीतं गृह्णाति तदासादनं पात्रीकरणं पु स्तीर्य
रोडाशाभिघार्य चरूणामप्यभिघारणं उद्वास्य सर्वेषां आसाद
नं तत्र देवतालिंगमंत्रेणाहृतेन तत्तद्देशे आसादयेत् ध्रुवा पुरो
डाशचरूणामालंभः यज्ञप्रैषो पुरोडाशोपकारको वार्त्रघ्नावा
ज्यभागौ तत्प्रकारको स्थाल्याज्यकांडपंक्तौ यथाग्नीषोमीय
पुरोडाशमेव यथा आग्नीषोमीयस्य पुरोडाशस्यानुद्रुहीतीति
अवदाय प्रत्युपस्तीर्य तत्र नमस्यत्र नेह स्विष्टकृदर्थमेव प
नैवदास्यमानत्वात् अतिक्रम्याश्राव्य प्रत्याश्राविते आह
अग्नीषोमाभ्यां पुरोडाशं प्रेष्येति प्रेष्यप्रैषः इदमग्नीषोमा
भ्यां नमम अथ कात्यायन श्रुत्यनुसारात् यज्ञप्रैषाणामाध्वर्यवेदिन
श्रुत्या प्रेष्यप्रैषाणां दिवस्पृहविषावयचार रिस्वाम्यादयस्तु प्रेष्य
प्रैषपदमेवाहुः उपांशु देवतादेवसदेविकाहवींषि इतिस्तु वक्षा
त सवित्रे सत्यप्रसवाय यान्धहू होतुरुक्ते प्रेष्यप्रैषपदेऽप्रपास्ता
यज्ञप्रैष्य पदं होतुरेवानुवाक्याः आघपदोऽवयतोऽध्वर्योरेव
वाचनं सवित्रे सत्यप्रसवाय प्रेष्येति प्रशास्तारं सवितारं सत्य
प्रसवं यजेति होतारमाह त्यागाः स्पष्टाः अग्नये गृहपतये
ऽवदानादि बृहस्पतये वाचे नुद्रुहि बृहस्पतिं वाचं यज इंद्राय

कात्य ४ ज्यैष्ठायान्नद्गहि इंद्रस्येंद्रियायेत्यादि रुद्राय पशुपतये मित्राय सत्- पश्वति
त्याय वरुणाय धर्मपतये अवघप्रेष्यप्रैषपदेऽपष्टतिरिवि
ष्टकृदर्थं सर्वेभ्योवदानं द्विरभिघारः यजप्रैषपदे तु उक्तमेव
चरि ऽध्वर्युर्यजमानदक्षिणेन वाहोगृहीत्वाब्रवीति सवित्रा
त्वासवानां सुवतां वरुणो धर्मपत्नीनां इमं देवा इंद्रियाय
इमममी विशः पुत्रं गंगायै पुत्रमस्यै विश एषवः कुरवो राजा एष
वः पांचालो राजा सोमोऽस्माकं ब्राह्मणानां राजेत्याह कारवा
नां माध्यंदिनानां तु इमं देवा असपत्नं सुवध्वं महते क्षत्राये
त्यादि शान्तिर्यजमानेऽमी इत्यत्र तद्धानामग्रहणमिति तस्माद्
ग्रहणमिति मैत्रेयपांस्थानमितिस्तुवात चस्यैइत्यपेतवृ मस
वद्गनद्भिर्नानप्रजानामग्रहणं अस्यैकौरव्यावि शोऽस्यैपां
चाल्यावि शो इति कारावस्तुतेः तेनैदंसिद्धं अस्यै कौरव्यो विशो
एषवः कुरवो राजेति केचित्तु सब्राह्मणा पुरस्कामात्रे राजगा
त्वोपवरा द्विप्रवि श्यपि यजमानदेशप्रजानामग्रहणमाहुः
तन्नयुक्तं यस्यैविशो प्रजाभवन्ती निर्गुण्यासाद्गा ग्रहणे एवासिद्धत्वे
नोपादानात् नविधौ परः शब्दार्थ इतिन्यायात् इदं देवा इंद्रिया
यइममेविशः पुत्रं गंगायै पुत्रमस्यैविश एषवो राजा सोमोऽस्माकं
ब्राह्मणानां राजेति मन्त्रे ते एषवः कुरवो राजेति रामचन्द्रः अ
प्याविष्टकृत् प्रेष्य प्रैषपदे समानयत्राह अन्य यावदानान्स्रुवं
पत्रयो मैत्रा वरुणाहो तावा अध्वर्युरन्तयेच्छ्यातिमैत्रावरुणा
नसंचरा अध्वर्युणा प्राशित्रावदानादिसर्वंसौमिकं कर्म प्राशि

तस्मात्सर्वहविर्भ्य इडाच अवत्त्र्यंकरणं हविःशेषस्य यजमान
देवि नियोगो भागात्सर्वेभ्यः आग्नानरनुवाका आकृतं कर्म
३ तेनः पात्रयोजनकाले त्रयस्त्रिंशत्तनसह स्वदक्षिणापक्षेष्वा
ग्रयणास्थाली अपरेणाचमनं स्वहस्तौ ईडंवरांष्वा दाभ्यपात्रस्य योजनं त
तोनिरिक्तस्थले वाहिस्यन्यग्रहपात्रयोजनं उक्तावित्तिर्ष्वरूपाज्योति
गनियोर्निवृत्तिः सहस्रदक्षिणापक्षेष्व प्रदाभ्यग्रहणात्त्रयस्त्रिंश
द्दक्षिणापक्षेनांश्वदाभ्यग्रहणं सहस्राधिकदक्षिणोक्तनियमेन
स्यात् तद्विधिर्यथा एकधनानयनानंतरं तान्निधाय अभिष
वात्पूर्वमध्वर्युरौडुंबरेणाचतुःस्रक्तिनाग्रहं पात्रेणांशुंग्रहगृ
ह्णाति तत्र सर्वत्र स्रुसी यथा अद्भिमादायां भून्युप्तं दर्यकादि
स्य तामिर्लिग्रः भ्यामि रद्भि रूपसिच्यक्रजिमु घम्यानुघम्यवासकं
कृतस्य पात्रे समुष्टिनागृहीत्वा आहवनीयं गत्वा तूष्णीं जुहोति
सर्वं इदं प्रजापतय इति त्यागः ग्रहग्रहणादिहोमांतानिक
र्माणि रतुह्य स त्वेच्छयाकुर्यात् होमांते हिरण्यंवापजिघ्रत्य ध्व
र्युः यजमानस्तत्र ध्वर्योत्तिभ्यद्वादशावत्तस्त रीरिर्गर्भिणी रेष्णुद
दामीति ददाति ज्ञातस्यप्रियस्य अनूचानस्याव काशावाचन
वाचितस्य यजमानस्यांशुग्रहणं नान्यस्य तत्संनियोगशि
ष्टमादाभ्यभवित्तुमिष्टो यजमानस्यांशुं ह्णात्यध्वर्युः यथा त
स्मिन्नेवांशुपात्रे तूष्णीं निग्राभ्या अथ श्वासिच्यक्रमेणांत्रीन्सोमांशू
न्निदधाति उपयामगृहीतोस्यग्नयेगायत्रछंदसंगृह्णामीति प्रथ
मं उपयामगृहीतोसीद्रायत्वात्रिष्टुप् छंदसंगृह्णामीति द्वितीयं

उपयामगृ०सि विश्वेभ्यस्त्वा देवेभ्यो जगच्छंदसं गृह्णामीति तृतीयं
ततोऽनुस्तुभेभिगर इत्युक्त्वाऽऽहवनीयंगच्छंतंश्चभिपात्रस्थस्य
पस्त्रालोडयति प्रेषीनांत्वापत्म०त्रा घूर्णोमीत्यादि अदाभ्यंन्धम
जागृटवित्तस्मैत्वागृह्णामीत्यनेन ततआहवनीयेसर्वंजुहोति त
स्मैतेसोमसोमायस्वाहेति इदं०सोमाय आगत्यापूर्त्सोमेनि द
धाति उशिकत्वंदेव०पाय्योपीहीतिप्रथमं वशीत्वंदेव०पीहीति
द्वितीयं अस्मत्सखात्वं०पाहीति तृतीये द्वादशावत्सतृयोगाभि
तायोऽध्वर्यवेदाभ्यदक्षिणाध्वर्युवंत ततोधिषवणोपर्युपविशंती
त्यादिप्राहृतकर्म तत्रविशेषः अतिग्राह्यग्रहणाहोमकाला
तिदेशात्तेषांचाग्रेनत्वादत्तरागृहयणोक्तयावप्योगंतस्थानामिमि
द्वादशाहस्त्वग्रणात् आग्रयणादनंतरंवाहस्पत्यपात्रे०ततो
ग्रहणामाश्रवादिप्रकृतिवत् अथोज्ञातावृहस्पतिसवस्यात्रि
वृत्स्तोमत्वात्त्रिभिस्तुचैर्बहिः पवमानस्तोत्रगायेत्प्रकृतिवत्
अध्वर्येरग्नीदग्नीन्विहरतेति प्रैषे पशुनाध्यामेहीतिविशेषः राम
वाजपेयीव्यधुकरामित्रप्रभृतिनामत्ते अस्मन्मतेऽत्तोहः
एवमेवाहिककर्कवासुदेवादिभिर्विचारितं अथाग्नेयपशुपाक
त्यवार्हस्पत्यपस्योपाकरणं अग्निमंथनं आग्नेयंनियुज्य०दे
वस्त्वा०बृहस्पतयेजुष्टंनियुनज्मीतिवार्हस्पत्यानियोजनं प्रोक्ष
णा अज्ञात्वोषधीभ्यः बृहस्पतयेत्वाजुष्टंप्रोक्षामीति
आग्नेयस्यांजनंकृत्वावार्हस्पत्यस्यांजनं अवाहने अग्निं०बृहस्प ५

त्रिः वनस्पतिमित्यादि आग्नेयस्य ललोपस्य स्पर्शनं कृत्वा बार्हस्पत्यस्य
ललाटोपस्पर्शनं संज्ञपयान्वगमतामिति संज्ञप्तौ पशू इति समितुः
प्रैषः माहि भूतमपि दाकुरिति नियोजन्योः प्राशनं आग्नेयस्या
अग्रशोधनं कृत्वा बार्हस्पत्यस्य अग्रशोधनं तच्छेदवरा· आ
ग्नेयतामि छेदनं कृत्वा त्वचामूलाज्ञानं० त्वगाग्रस्य सव्यकरणां
तथैव बार्हस्पत्यस्य त्वगामूलयोः प्राशनं वपोद्धेदनमुभयो :
नाभ्यावपाश्रपण्योः प्रोर्णावनं वपाश्रपण्यां प्रतिप्रस्थाता: प्लुते
प्रचरेति प्रैषः आग्नेयवपायागः प्रकृतिवत् बृहस्पतये छागस्य
वपायै मेदसोऽनुब्रूहीति · अनुवाचनप्रैषः एवं वषट्पामाद्यातिके
स्या आश्राव्य प्रत्याश्रावित आह बृहस्पतये छागस्य वपा मेदः प्र
स्थितं प्रेष्येति द्विदेवत्यग्रहवमसमभद्रानन्तरमासाद्य दक्षिण
स्य हविर्धानस्य पश्चाद्दक्षिणं निदधेति क्रमसानधत्तेना राशंसा अ
वैश्वदेवात् इति सूत्रात् तत्रान्तदानि हि नैष्कनाराशंसेषु गो
गवयागेता एवगा अनुनयाकृता एकादशाकृतिरम्पादक्षिणा व्या
ख्याति आस्मिन्नो गवो एकादशोगावो यथाविभागं ब्रह्मादी
नामृत्विजां दक्षिणा इति एकादशशतानि वा एकादशसह
स्राणि वा ततो धर्युरच्छावाकार्यमुख्यापितं सवनीयपुरोडाश
शकलमादाय समुपहूता स्म इत्युक्तो आत्तिरसुति इत्यादि प्राकृतं क
र्म पशुपुरोडाशानिर्वापो आग्नेयानन्तरं बार्हस्पत्यस्यानिर्वापः
अवदानमुभयोरुभयोः पश्वोः एकुम्भले एको रवायां प्रदेशः
उभयोः त्रिः प्रच्यावयतात् त्रिः प्रच्युतयो हृदये उत्तमं कुरुतात्

क्रतु ६ त्तिप्रैषः पश्वोः संवदस्वेति च उन्नात होतृप्रणात्वन्नाल्लरणा छंदशिक्त्रा पद्धति
६ च्छावाशस्त्रस्तोत्रेष्वपि शेषस्तत्र तत्र योगो लिखितः शेषं प्रकृतिवत्
इति प्रातः सवनं समाप्तं इतिश्री माध्यंदिनदीक्षितमहायाज्ञिकसूर्य
6 ज्ञकृत्कारयित्वा च तस्य सूनु श्रीकेशवदीक्षितेन श्रौतस्मार्त्तागम
तत्वज्ञेन तस्य कृतौ यज्ञविधिरत्नगुफवल्यां कमलतिकायां प्रथमः
परिच्छेदः समाप्तः अथापरो गुफो विधीयतेधुना सर्पराज्ञादिमा
ध्यंदिनसवनं आग्नेयानंतर वार्हस्पत्यपशुपुरोडाशयागः
वृहस्पतये पुरोडाशस्यानुब्रूहीति त्रिरनुवाचनमवघत्तः उपस्त
तीर्णिष्टकृदर्थमवदानं अतिक्रम्याश्राव्य प्रत्याश्राविते वृह
स्पतये पुरोडाशं प्रस्थितं प्रेष्येत्याह यदि यजमानस्याज्येना
भिषिच्यत इति पदस्तत्र दाधुक्कामा यिप्रवारातेन तत्र स्थाप
नं तत्र भक्षः गाधाहुतिदक्षिणाहोमः प्रातः सवनिकीभिः ह
हृदक्षिणानां दानं होत्रर्मरुत्वनीयशास्त्रे विशेषो ज्ञेयः त
तस्त्रमसाप्यायनं प्रकृतिवत् अध्वर्युरौडुंबरीजानुदघ्नीमासंदीनि
धाय तस्यां कृष्णाजिनमुत्तरलोम प्राग्ग्रीवमास्तृणाति इ घंतरोभि
ति यजमानमस्यामुपवेशयति यंत्रासियमन इति ततो लौकि
केनाज्येनाध्वर्युर्यजमानमभिषिंचति शुक्रामाथ्यिसम्प्रवे रावा
देवस्य त्वा ● सहत्ता भ्यास रस्वत्यै वाचो यंतुर्यंत्रिये ● ऽभिषिंचा
म्यदः शर्मन इति विश्वेषां देवानां ● यंतुर्यात्रे येदधामीत्यादि
नावा सरस्वत्येत्वा ● यंतुर्यंत्रिये दधामीत्यादिनावा ततः
प्रतिप्रस्थाता वार्हस्पत्यपशुमनुजहोति यजमानेन ६

सत्यैव भक्षणं आतिग्राह्याणीति देशात् अप्योक्तान्तराणां तत्वोदसमा
मितिनो धसं वच्यसामन्तनीयं एष प्रकृतिवत् नौधसपदस्तु
नाकभाष्ये दूषितत्वान्न विकल्पनीयः सर्वेषां सर्वोपि विषव
त्तत्प्रयोगन्तेयः भक्षादि प्रकृतिवत् इति माध्यंदिनसवनं
समाप्तं तृतीयसवनेऽध्वर्युः पशुप्रचारे आग्नेयानन्तरं हवि
ष्कृतं कृत्वा बार्हस्पत्यस्य चरणं आग्नेयवसाशेषस्य पात्रान्त
रेकरणं जुहूवसाहोमं हवयां चोपस्तरणं बार्हस्पत्यावदा
नानि आग्नेयेन समस्य स्विष्टकृतो मार्ध्यमौपभृतावदान
ग्रहणं बृहस्पते छागस्य हविषोऽनुब्रूहीत्यनुवाचनप्रैषः
वसावदानग्रहणादि प्रत्याश्रावणाः बृहस्पतये छागस्य हवि
प्रस्थितं प्रेष्येत्या आव्य प्रत्याश्राविते प्रैषः वसाशेषसमासिच्यादि
ग्व्याधारणं निहितेषु नाराशंसेष्वेकादशगामन्त्रेन याज्यान्ता तास्ता
तीयसवनिकीः ऋत्विग्भ्यो आदिशति एकादशशतानिवामः
हत्यारीवाऽग्न्यादिशेषयाज्यान्ता भक्षादि प्रकृतिवत् अप्याशु
यो स्नुक्रं हनेमत्र गने बृहस्पतेर्वनस्पतेरिन्द्रस्य वसुमत इत्यादि
गतोः अग्नेर्बृहस्पतेर्वनस्पतेरिन्द्रो वसुमानित्या दूपभृतः
शेषं अन्यत्सर्वमग्निष्टोमवत् तत्र त्रयस्त्रिंशच्छतं सहस्रदक्षि
णापदेति स्तोत्रं वं यस्याः स्त्री पातवं चादवसानीया संवत्सरोव
रेषु सन्वे ष समाप्स्वति पुराहस्रदक्षिणावरे सुचेति त्रैधातव्युद
वसानीयासर्वत्रैतिचगवामयनेस्सूत्रान्त तत्रान्वंवध्यायय।
मैत्रावरुणी १ वैश्वी २ बार्हस्पत्याचेति ३ पत्रासाद

नादिमैत्रावरुणायानूवंध्यावत् नियोजने मैत्रावरुणायं त्वं रं विश्वे
भ्यो देवेभ्यो जुष्टं नियुनज्मि बृहस्पतये जुष्टं नियुनज्मीति प्रोक्ष
णो विश्वेभ्यो देवेभ्यस्त्वा जुष्टं प्रोक्षामि बृहस्पतये त्वा जुष्टं प्रोक्षा
मीति च संघाने मित्रावरुणौ विश्वान्देवान् बृहस्पतिं कल्प
यति मित्रावरुणाभ्यामनुब्रूहीति सर्वं प्रैषे सूक्तवाकादेनो
पलक्षणं तार्तीयसवनिकव्यादिषु गीतामन्त्राणां करणं प्रै
षानुप्रैषा ऊहाद्य याः वषट् प्रयोज्याः ब्रूहन्ने मित्रावरुणायो
विश्वेभ्यो देवानां बृहस्पतेरित्यादि जुहोति: मित्रावरुणौ वि
श्वेदेवान् बृहस्पतिं तमपनुदन्तित्याद्युपमन्त्रः सर्वयाऽहदव
च्छलानामुपद्रुहतं च: स्तुनमामभिश्रावयेत्यादि: त्रयस्त्रिंश
त्सहस्रदक्षिणापक्षे त्रैधानब्रुदवसानीयासमारूढे ति
मेध्यत एवविको यथा अग्न्याधानादि ब्राह्मणान् पर्णा
नो विशेषः पात्रासादने द्वादशकपालानि हविर्ब्रीहियोव
वाश्च एकाण्डशाखपात्री दक्षिणास्थाने त्रीणि शतमा
नानीति स्त्रो धेनुवस्त्राणि वासांसि नित्यो गावो न उहोवा
यः अनडुत्पदेगौ वजीवा धिकः अत्र हविर्भेदान्नानावीज धर्मा
भवन्ति यथा उरुवायेत्तिमं त्राव्यत्वाप्त यक् प्रोक्षणं ब्रीहियव
योः नेत्रेण पदव्यतिरासः अभावे पृथग्गाभिमन्त्रणं अत्र
उदकस्पर्शः यच्छन्ताभीति मन्त्रावृत्त्या पृथग्गालंभः ग्रहणे
इन्द्राविष्णुभ्यां जुष्टं गृह्णामीति मन्त्रः तत्र ग्राह्यं सम्भवति चरुः
द्वयं पृथक्कृत्य द्वादश भागाः कार्याः तत्र त्रिभिर्भागैः प्रथमं

द्वितीये मुष्टौ प्रथमो भागो व्रीहीणां भागद्वयं यवानां पार्श्वकेन
ग्राह्यं तृतीये तु मुष्टौ प्रथमो भागो यवानां भाग एको व्रीहीणां
पार्श्वकेनैव ग्राह्यं चतुर्थे मुष्टौ भागत्रयं व्रीहीणामेव ग्राह्यं
भूतानां त्वेत्यावृत्त्या पृथक्कृतो याभिमर्शनं प्रोक्षणो इंद्राविष्णु
भ्यां जुष्टमिति भेदः अत्रैव पात्रा पर्यंकुस्थाजिनादन्नादि व्री
हीणां प्रोक्षणानंतरं पेषणं कृत्वा यवानामपि पेषणं प्रोक्षणानि मं
त्रसंति तत्र स्मृत्युक्ते त्वेति मंत्रावृत्त्या क्रमेण व्रीहियवयोः मं
त्र्यावृत्त्या पृथक्संयुज्य पिंडद्वयं धर्तं पृथक् च पिष्टं दत्वा देवस्य
त्वेत्यावृत्त्या पृथक्पिंडयोः पात्र्यावापः सम्यापश्चात्त्वा वृत्त्या
पृथक् संयुज्य पिंडद्वयं धर्तं पृथक् च पिष्टे दत्वा देवस्य त्वेत्या
वृत्त्या पृथक् पिष्टयोः उपसर्जनी [illegible] हरणं एकत्वोत्पन्नानिर्देशः अ
पिष्टलेपयोः पात्र्यां अंगुलि प्रक्षालनयोः प्रत्येकी कृत्य रक्षणं अ
धिश्रयणे व्रीहिपिंडं द्विधा कृत्वैकं भागं मध्ये यजमानं निधाय तदुपरि
यवपिंडं कृत्वा तदुपरि पुनः व्रीहिपिंडं निधायाविश्रपति प्रथनं
त्वग्दानं च करोति ततः पर्यग्निकरणं प्रपणं उद्वासनं पात्र्यां
मृष्टावस्यानि धानं इंद्राविष्णु गच्छेति प्रारादानं प्रियेणधाम्ना
प्रियं सदः सीदेति विधानसादनं आवाहनं देवताशासने
अग्निमग्न सोमं देवा आज्यपा इत्यादि इंद्राविष्णुभ्यामनुब्रू
हीत्यनुवाचनं जुह्वामुपस्तीर्य तस्यावदानानि गच्छतीति यथा
त्रिभ्योऽपि धातुभ्योऽवदानानि गृहीत्वा तानि स्रुक्: अभ्युपस्तीर्य
दत्तात्यन्मजुयातिक्रम्याश्राव्य प्रत्याश्रावितमत्रा हिंद्राविष्णू

यजेति वषट्कृतेजुहोति इदमिंद्राविष्णुभ्यामितित्यागः अथ स्विष्टकृत उत्तरार्द्धात्सकृदवदाय द्विरभिघार्य प्रत्याश्राव्य प्रत्याश्रावि ते अग्नये स्विष्टकृते यजेति दक्षिणाभिमंत्रणे प्रजापते र्भागः स्योर्जस्वान्पयस्वान्प्राणा पानौ मे पाहि समानव्यानौ मे पाहि उदानव्यानौ मे पाहि हिरण्यगोवासांसि स्तु० पद्दे हिरण्यगोवासोजाश्वोर्जन्मायि धत्तादितित्यदितपोवा खिमामे ददे ब्रह्मणोत्रेति अस्याऽऽग्नेयी दक्षिणानि स्वाधेनूहोम ऋषभमहं संप्रददे ^ तिस्रोगा अनन्तस्यो देऽजमेव वाग्नेय्यृषभ महं संप्रददे बृहत इंद्राविष्णोरुरुजितेति अन्यदादीपनांत मग्निष्टोमवत् सर्वपरियज्ञेषु चक्रात्त्विग्वरणादि घादीप नांतं पृथग्भवति कालभेदात् इतिश्रीमत्सकलविद्यावा गराधिपतिमहारिनानाविद्याष्ट्ययज्ञकुत्सारयिताच महायाज्ञिक मौलिपुरुषमपरागसवलितचरणानुयत्रहस स्यचरणारस्याचरणाचर्याचार्यश्रीविट्ठलदीक्षितात्म जकेशवदीक्षितश्रौतस्मार्त्तागमतत्त्वज्ञत्राणायनीत्य पराख्यावान्महाराष्ट्रदेशवर्यकोटपुरस्थकाश्रीकृत वसानिस्तस्यकृतौ श्रौताराविविधिरत्नगुंफमालाकल्पल तिकायां बृहस्पतिसवयज्ञोवाजपेयांगभूत एकाहोऽ ग्निष्टोमसंस्थस्त्रिवृत्समाप्तः ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥

ॐ श्रीगणेशाय नमः ॥ अथाभिधास्यते सम्यक्विधि वाजपेयक्रतुः ॥ अथवाजपेयः ॥ तस्यकात्यायनः सूत्र

८

ॐगिरौ श्रवणे श्रवणे मे नमानैव सिद्धुभ्यमहं संप्रददे
ॐगिरौ वामसोदित्तेजा उत्तमवाग्नेयीर्भमहं संप्रददे ४.८

दीक्षाश्चाह एकाहत्वात्साह्नत्वमश्वतिस्र उपसदः स्युः एकस्मिन्नं
दिनमित्येकं विंशाति दिनानि तत्र यद्यपि दीक्षाप्रभृति शुक्लपक्षे
इति दीक्षोपसत्सुत्याः शुक्लपक्षे सूचिताः ० तथापि सौत्यस्य प्रधा
नत्वादाश्विन्यां कार्त्तिक्यां वा पौर्णमास्यां सुत्या युज्यते ततः पूर्व
मेकविंश्यां कृष्णदशम्यां दीक्षारंभः एवं चैकादशदीक्षाश्चापि
शुक्लपक्षे कृत्वा स्युः सप्तदश दीक्षाः सप्तदशापवर्गा चेति आश्वला
यनमतं अथ छंदोगसूत्रे यं ब्राह्मणो राजा वान्यः पुरस्कुर्वीत स वा
जपेयेन यजेत तस्य पौर्णमास्यां दीक्षित्वा त्रयोदश दीक्षाः स्युः
सप्तदश वा अमावास्यायां दीक्षित्वा न मासामिति गौतमः
संवत्सरमिति धानंजय्यः षडुपसत्कः प्रसाग्निचित्यश्च सुत्या
दिति आश्वलायनोऽपि सप्तदशा दीक्षाः सप्तदशापवर्गाश्चे
ति शांखायनोऽपि तस्य त्रयोदश दीक्षास्तिस्र उपसदः स्यु
स्यः सप्तदश महरिति त्रयोदश दीक्षा उक्ता स्ताश्च पौर्णमास्या
मारम्भणीया उक्ताः तत्रापि सौत्यस्य पर्वराय नुष्ठानं प्रतीयते
तत्रैवामावास्यायामारंभो मासदीक्षापक्षे अमावास्याया
मारंभः संवत्सरं दीक्षाः षडुपसदः साग्निचित्य इति परि
यत्र भेदः सूत्र तत्र बहुविध उक्ताः स तत एवावधार्यः गणपति
पूजनादि विधाय प्रधानसंकल्पः तत्र सप्तदश शतानि गो वस्त्रा
जाविसप्तदशानि कंकंठ वली हस्ति वत्यक म हान सूर पू
विरो न सप्तदश प्रस्तोमेन रथैनरपृष्ठेन वाजपेयेनाहं यक्ष्ये तत्रे
भिर्वस्त्रालंकारादिभिरा षित त्वं मे ब्रह्मा भवेत्यादि वा उक्तानि

क्रतु ८

9

रवरवां लाघायनसूत्रेणतदस्य: सप्तदशोऽङ्गियते निष्क: सुव पद्धति
र्णौ षष्णत्तु भि: अत्र शीमित्ति छज्ज: सुवर्णा: वैश्यकं मनुष्यैर्वासंचतर
स्त्रंयानं लाघायनसूत्रेण सप्तदशास्वाशिणागवां श्वाश्चाश्च ६
सप्तदशाधिका: शाकटानि च सप्तदशीकानि. हस्तिनां हिर
ण्यकक्षास्त्रमाश्वलायनेनोक्तं शताधिकानां विंशत्यादवो
युक्तवक्तृनां गजादीनां नानापरिमित्तागवाणादातव्या इत्या
श्वलायनस्य वैकल्पिकं पक्षान्तरं महारत्नसमहारत्य: मतद्व
तन्त्रग्रन्थस्येति शांखायन: सप्तदशगवां शतानि ददातिसप्त
दशवासस्सां सप्तदशयानानि युक्तानि तिष्ठन्ति सानिष्कान्
उद्भीतिसानि सप्तदशास्सप्तदशानि भवन्ति सप्ताज्ञो वाजपेय
वयसो वयस: मानवेदाद्वितीयो होमौ कृत्वा सप्तदशासप्त
दशानि ददाति सप्तदशानि निष्कान्सप्तदशमाला: सप्तदश
दासी: सप्तदश हस्तिन: सप्तदशगवां शतानि सप्तदशावी
नां सप्तदशाजीनां सप्तदशारथान्सप्तदशारोहयाणानि सप्त
दश सप्तदशानि उष्कलै: सर्जित्वा यजुर्वेदे नत्कमद्यु यवेद
दाति. गांधवप्रतीनयतिसु युध्वंत इत्यारापश्चाद्दूयानीति
कोष्ठकेवाराहपुष्पवाकप्यवमेवास्ति अत्र यत्र इक्षापशु
नासोमेन वा यजेत सोमावास्या यां पौर्णमास्यां वा यजेतेति श्रुत्य
न्तरानुसारात्सकृद्दर्शपौर्णमास्याम् . तदा मुक्तपद्रोपद्रोहारंभ:
-- दीक्षाप्रभृति अग्न्यादिपत्नीतौ विशेष: [illegible] वा कालेन विवा
तार्यमस्यादिभ्य: प्रागेद तत्पत्नीत्वाय [illegible] स्वरगयमालासम ८

परितां होतृकृतवज्रमिंद्रः शतपुष्करां स्वर्णमालामाश्वलायनेनोक्ता
होतृवरण्यैवामापि महर्त्विजामुपयुज्यते यजमानस्य पत्न्याश्चहि
रण्यमालाबंधनं अथ प्रागपवर्गदीक्षायाः निरूप्याज्यमधिश्रित्य
पर्येक्षुक स्रुवसंमृज्य उद्वास्योत्पूय चावेक्ष्य सकृज्जुह्वा गृह्णासि जुहुति
इत्याहवनीये जुहोति ॐ देवसवितः ॰ स्वदतु स्वाहा इदं सावि
त्रे वाजपेयांगभूतस्य याजयजुर्नीनां सांगानां पुरस्ताद्वैयमाहुतिः
ननु तदंगप्रयाजादीनामपि पुरस्तात्कर्मणांचोद्ये तन्नु दीक्ष
णीयारंभे पुनराहुतिः दीक्षणीयायाः एककर्मत्वात्तदादौ सकृ
देवाग्नीषोमीयपर्यन्त्वारानंतरं चैयमाहुतिर्न हूयते तदाहुस्त्रा
त्याया इति सत्त्वात् तेनक्रयणावेद्यारंभणा प्रवर्ग्योपसदनाग्निप्र
णयनहविर्धानाग्नीषोमीयाणां सदस्याग्नीध्रीयाधिष्ण्य
निवपनवसतीवरीग्रहणपरिहरणोपांशुपात्रकर्मादौ भवति
येसामान्यावाजपेयांगभूतायजनयादीक्षणीयास्तदादि
ष्वेवयमाहुतिर्नतदंगभूतप्रयाजादीनामादिषु क्रयणोत
वज्रनिर्गृहीतग्रहणात्प्राक् वेद्यारंभणोपवपो वीक्षिक्याप्रच
र्यप्रवर्ग्योपसदनेष्वंतः पात्न्यदेशो परि धर्मनिधानात्प्राक्
अग्निप्रणयनेचप्रवर्ग्योत्सादनोत्तेप्रणयनीयाधानात्
पूर्वत्रोहविर्धानप्रणयनेतु उपयमन्युपनिवपनांते एषा
त्तभयतानिधानात्प्राक् अग्नीषोमप्रणयनेचाग्निप्र
णायनेचापिप्रणायतानंतरं सदःकरणोक्तंतःपात्न्यात्प्राक्
मणामीडेवपर्युक्तःप्राक् आग्नीध्रीयगृहकरणात्पूर्व।

क्रतु
१०

ऐंद्रमसीनिकृत्वाधिष्ण्यनिवपनात्पूर्वमग्नीध्रीयमृत् संस्काराः सत्त्वान्
वसतीवरीग्रहणोत्क्रमतीयोमी यवपामार्जनांते तत्परिग्रह
णोत्व्युत्क्रामतेति प्रैषांते दीक्षास्तुचकासिंश्चिद्दिने व्रतदोषा
नाधिष्ण्यप्रयणांते ऊपाकृत्यादिसप्तचतुष्टयाहरणांते प्रकृतिवत्
यूपेतु विशेषः सप्तदशारत्निरूपरिगर्तवानतोदनागाः समा
ग्रो गोधूमपिष्टमयचषालः साध्यवालश्ववाजतादिसिद्धये
यंसाध्यसंप्रोक्ष्यवदत्पन्तुक्तलक्षणाः साग्निचित्येतु इयंष्टका
पप्वादि यथाकालंकृत्वा दीक्षणीयायामादित्ये प्योच्छनेच
रुरित्यादि ओंकृभरणाविशेषः इंदुशिक्यासंदीकरणविष्टुक्रम
वात्सप्रादि विशेषोस्मत्प्रयन पद्धत्तेरेव धार्यः कस्मिंश्चिद्दी
नादिने महावीरकरणं प्रकृतिवत् प्रथमोपसद्दिनेचव्रत
करणप्रैषांते प्रायणीयादिक्रियते तत्रप्रथमं सावित्र्याहुतिः
ततः प्रायणीया सोमक्रयणात्प्रपूर्वं सावित्र्याहुतिः त
त्रवाजपेयस्य षोडशि विकारत्वात् षंढयामुष्कांगयात्र
धिलोहाकरणीं वत्सवोः त्रधिलंबकरणीया षोडशिनः सो
मक्रयणाया एकाहस्य ह्यगरोष्याविशेषादिति एकाहेषु
क्षत्रियाणामादष्टयेव सोमक्रयणीहस्यात् तत्रस्मरणावति
परमरवीवीष्ठितम्रवीत्यन्ये पीतपृष्ठेत्यपरे ऊगस्वे
लोहा तीत्यरहाः त्रधीकरणीति लोहितकरणीं सोमक्रय
णाकालेनेष्टा सोमक्रमणादेशादिरणतः केशवाक्षी
घकिप्राणत्वरुपान्तीसेन परिस्तृत सिप्रायात्तत्रव्याख्याणां १०

वाक्रयसंकरोति द्रव्यक्रयणापद्धेष्टयकृष्टयकृद्व्याणांक्रय
णां तत्रप्रथमप्रतिवचनेयथा सुरासोमविक्रयिक्रय्यासुरासो
मा२इतिनेष्टा क्रय्याइतिविक्रयी तान्येतेक्रीणानितिइतिनेष्टा
क्रीणानीहीतिविक्रयी सीसेनतेक्रीणानीतिनेष्टा क्रीताः।
सुरासोमाइतिविक्रयी एवमेकैकद्रव्यक्रयः द्रव्याणिच्चु
शब्दं॰ निरूढव्रीहयः तोक्माविरूढायवाः २ गजाम्रष्टव्रीह
यः ३ व्रीहिमंडः ४ श्यामाकमंडा ५ नदोदनो ७ दुग्धं
चेति ८ सूत्रोक्तानि सौत्रामण्याद्रव्याणि कुवलकर्कंधु
बदराणि॰ श्रीणानीत्क्तान्यपिकेचिद्द्रव्यगणोत्तमाविदधति तु
त्रकुवलानि॰ आमबदराणि॰ आमानकठल्यातीत्यता ६
कर्कंधून्यर्धपक्वानि॰ अनुपजीव्यानि द्रुघ्नाणिबराणीत्ये
१० बदराणिचपक्वानि॰ प्रसिद्धानि ११ अन्यानिचद्रव्याणि
किराव्वादिद्रव्यानि॰ नग्नहुनामकानिसुरा शास्त्रप्रसिद्धानि य
था सर्जत्वकुत्रिफलाचैवशुंठीचैवपुनर्नवा चातुर्जातकसं
युक्तापिप्पलीगजपिप्पली वंशोधिकाहरिद्रे चित्रकंचेंद्र
वारुणी अश्वगंधासमुत्था धमूलान्येतानिद्विशोन धान्य
केचपवानीयजीरकंहपुषाजीरके हरिद्रेचव्यचैवाविरूढा
व्रीहयोयवाइति तत्राविरूढाव्रीहयोयवाश्वगृह्येवोक्ताः अ
न्यानिचगर्विधानिवक्ष्यते सर्जःशालत्वक् त्रिफलहरी त्तस्य
तकीविभीतकामलकरूपा चातुर्जातकंत्वकपत्रकेलानाग
केसररूपं १ वंशोधिकावंशकरीरः हरिद्रेछत्रंभूषत्रं वंशा

धिकादीनि पंचस्थलान्येव क्रीते सोमेऽनसापर्युक्षमाणोने हृः स्थ
द्रव्याणामनुग्रहणं सिद्धक्रीताया वास्तुरायाः इति शालाद्वारे शा
शालां प्रवेश्य द्रव्यपदेशादिरणाग्नेः पक्लाशालानैर्ऋतकोणे ने
त्रपक्तरं क्रीत्वा स्थापयति तत्र द्रव्यक्रयणापदेकरणानुक्र
ते नवेत्यस्मीपदार्थाः उलूखलमुसलं स्वद्रुपलं सूर्प
चरुस्थाली कुंभी इत्यादि द्रव्याणामुपकल्पनं दक्षिणाग्निस
मीपे अवहत्यफलीकृतव्रीहिश्यामाकयोर्लौकिकोदके
न पृथक्पक्वं दक्षिणाग्नेरपहृत्य तदा च स्रुक्कुंभ्योर्निषिच्य न
पुरुचूर्णपिष्ट्वा उदनान्यासहकुंभादिपाति दुग्धं चावप
ति ततः पिधाय शालानैर्ऋतकोणोरणीनि दधाति तत्
तस्मात् इष्ट्या नत्राद्यो सावित्र्याहुतिस्ततउपसत् एवं द्व
त्युपसत्सु अतिग्रष्यमोपसदादिविशेषः द्वितीयोपसद्दिने
यौवी शिक्याग्रवर्ग्य त्रवेदिमानात्सर्वेसावित्र्याहुतिः ओति
मोपसद्दिने प्रवर्ग्येत्सादनेऽनन्तः पात्र्ये परि घर्मानि धानात्प्र
कसावित्री अग्निप्रणयने प्रणायनीयात्पूर्वेसावित्री हवि
र्धानप्रवर्तने च पयमनुपानिव पात्यतेऽनसोः एष्ट्वा मभ
यतोऽनि धानान्न प्राङ्सावित्री हविर्धानगर्हस्यदक्षिणाभिति
भित्वा परद्वारकरणं कराणार्थं सोमग्रहाघर्येरवरहूत्वा स्मर्ति
रणा हविर्द्धानानसोर्दक्षस्य पश्वाद्यावापृथिवीरवरकरणं मद्रः कर
णेतः पात्या यह्न प्रक्रमणं ततः पूर्वे सावित्री अग्नीध्र
हकरणे च सावित्र्यनंतरं करणं धिष्ण्यनिवापे च सावित्र्यनंतरं

भूतसंस्कारादिति वापः अग्नीषोमीयपश्वारंभे तु सावित्र्यनंतरं वाच
स्पति प्रैषादिः अग्नीषोमप्रणयने वृत्ते वृत्ते प्रणायनीयाधा
नान्मूर्ध्वं सावित्री यूपपरिव्ययणांते सप्तदशवाससोभि यूपवेष्टनं
ऊर्ध्वं ग्रंथिकरणं वाऽवाचूडवृत्त अग्नीषोमीयवपामार्जनांते
वसतीवरीग्रहणे सावित्र्याहुतिः वसतीवरीपरिहरणं च वृद्धकामा
तेति प्रैषांते सावित्री साग्निचित्ये पि शतरुद्रियादि संचिति
कर्मणामग्निसंस्कारपरत्वादग्नेश्चोत्तरवेदिस्थानापन्नत्वात्तत्र
चाहुतेरभावान्न सावित्री एवं कर्मांतरेष्वन्यत्रापि नाहुतिः स
वनीयचरुयद्वयपर्यग्निधर्मपर्यंचाप्याकृत परिवाप्यवद्दुर्गचतु
ष्टयदोहनानंतरं प्रातः सवनिकसवनीयपशुस्थाल्याः पावनमा
पाकृतत्वात्येषां सत्रानां षड्गर्भितानां हर्मीमपाकरणं यजमा
नापेक्षापर्यमन्यत्राकृतिवत् अपररात्रे त्वृत्विक्प्रवोधनादे
विशेषः पात्रासादने सोमचुतयोरवपात्रपराद्यः ईउश्चषेषेटु
ख्वे माहेंद्रेतु वसाग्रचारपद्धेऽङ्गग्याया गार्ह्यपत्यकल्पनीयो
वा अजमेषयोः पाकवैधर्म्यात् यद्यपि मारुण्ड्यस्तेजेषे
वशाप्यग्निकृता० वपाचस्यात् गोः वृद्धिस्मिकृत्रा इति न्यायतो
वपाश्रयणी षड्मुखाग्रं च सिद्धेन त्याधिकलोगोपशोर्गाहि
तत्वाद् धर्मशास्त्रानेमेषीग्रहणेते अस्वर्ग्यं लोकविद्विष्टं धर्मम
प्याचरेन्नतु इति स्मृतेर्न गो मेधशास्त्रानापत्तित्वेतद्धर्मप्र
त्तित्वं च मीमांसायां विचारितत्वात् तस्याश्रेंद्रेणामेषेरा
सह पाकाद्यर्थं वपाश्रयणीच तत्र यमेव भवति उक्तेतः पात्र

योजने आग्रयणस्थालीमपरेणाचक्रसक्तौ रौडुंबरस्यां स्थप
न्यपात्रस्य योजनं तदपरेणाग्रयणमति ग्राह्यपात्राणां त
तः षोडशिपात्रस्य चक्रः सक्तौ रवारस्य ततः पंचानां ऐंद्र
पात्राणां ततः सप्तदशग्रहपात्राणां तृतीयसवनेचमसे।
सवनेयानां योजनं मधुग्रहार्थं हिरण्मयपात्रस्यापियो
जनं अप्या ध्रुवेकधनाः यदास्मपरराज्ञे हविर्धानमध्येउद
कपूरणी आनीय प्रवेशयन्ति तदा यमग्नेपृक्षस्व रिषः इत्यने
नसरण्यालंभः प्रविशन्त्येववाविना मंत्रेषोडशिविकारात्तु
ततस्तु नानितमंत्रेणा ध्रुवद्रूणी येषु होमो नापि प्रयमुप
धिष्ण्यादिरालंभो अग्निष्टोमोत्कृष्टातिरात्रे स्तुहितौ प्रवेशप
माना स्चैकधना स्तनेस्ता हविर्धानस्यापरेण तावद्धि दिव
सेनिर्व्यादितां स्तरां पश्चिमेन द्वारेण प्रवेश्य पश्चिमरवरोत्त
रधाति दक्षिणातः संधिं करोति इति संधिकरणं प्रागुक्तेने
नसंधिनास्तरणग्रहसंबंधीनि सप्तदशावुरणपात्राणि अत्रा
हृत्य एकस्मिन् महति द्रोणकलशसदृशे आधरणं पावनपा
त्रमहत्त्रेपालाश्रयं मा हृत्य गो अश्ववालमयेनैकान्तो दशापवि
त्रेणास्तरणं पयस्वारणापात्रेषु नानि रसरूपां मलाधिवेच
यन्तीत्यर्थः दक्षिणतः पात्राणाय भ्यवहन्ती त्येतावत्स्व
प्रारंवायां अन्यत्सर्वं शाखांतरात् अग्न्याधानीना
कधना अपोति धाया भिषवतात् पूर्वमौडुंबरेणाचमसे यति
नाद्याचेरणां ग्रहं गृह्णाति तस्य प्रदक्षिणा प्रतिग्रहान्त

सर्वकर्मव्रतस्यात्तिसववत् ततोऽदाभ्यग्रहणांतस्यापि सदतिरागा
दान्ता तं सर्वकर्मव्रतस्यात्तिसववत् कृत वाजपेयसंस्था वाजपेय
योनंश्चिदाभ्यो सहस्राधिकदक्षिणाभ्यावादिति॰ केचित्तु वाज
पेयराजसूययोर्ग्रहीतव्यमिश्रुतत्वात्॰ अं॰ मुं॰ गृह्णाति सर्वा
त्वायैवेति श्रुतेः वाजपेयोक्तत्वाद्भवतीति॰ सत्यं महावाजपेये
वभवतिन संस्थावाजपेय॰ संस्थात्वात्॰ शाखांतरीयोक्तत्वा
च महावाजपेयं प्रकृत्योक्तत्वाच्च वाजपेयजात्याक्रांत
त्वेन भवतः॰ इति ततोऽधिषवणोपर्युपविश्य तीन्त्यादिमंत्रा
णुधरा ग्रहणांतं कर्म ततोऽग्निग्राभ्या धारातो गृह्णाति॰ अ
ग्ने पवस्व स्वपा॰ यो॰ उपयामगृहीतोस्यग्नये त्वा वर्चसे गृह्णा
मीत्याग्नेयं १ दशापवित्रसंमृष्टं सादये धौतिनाखरे
एष ते योनिरग्नये त्वा वर्चसे सादयामि इति तत उत्तिष्ठन्नो
जसा॰ स॰ तऽउपयामगृहीतोसीन्द्राय त्वौजसे गृह्णामीति द्वि
तीयमैंद्रं २ दशापवित्रसंमृष्टं सादये धौतिनाखरे एष
ते योनिरिंद्राय त्वौजसे सादयामीति ततः अदृश्रमस्य॰ के
त्या॰ उपयामगृहीतोसि सूर्याय त्वा भ्राजाय सादयामीति
तृतीयं सौर्यं दशापवित्रसंमृष्टं सादये धौतिनाखरे
एष ते योनिः सूर्याय त्वा भ्राजाय सादयामि॰ ततः षोडशि
नं खादिरेण चतुःस्रक्तिना धारातो गृह्णाति मंत्रा तिष्ठ
वृहन्नुचे॰ वग्नुना॰ उपयामगृहीतोसीन्द्राय त्वा षोडशिने गृ
ह्णामीति दशापवित्रसंमृष्टं सादये धौतिनाखरे एष ते

योनिरिंद्रायत्वा षोडशिने सादयामीति पुनश्चाहिके त्रिनाऽन्चर पद्धति
उप० सीद्रायत्वा षोडशिने गृह्णामीति वा षोडशिग्रहणं यथा
प्याति ग्राह्यग्रहणस्य कालत्रयं० षोडशिग्रहणस्य कालचतु
ष्टयमुक्तं तथापि प्रातःसवनेति ग्राह्यानुक्तौ हित्वा षोडशिनं
पंच चैंद्राणि त्रिस्त्वादि हैव ग्रहणं ततः पंचेंद्रान्वाजपेयग्रह
नाद्गृह्णाति धारातः ध्रुवसदं त्वा नृषदं इंद्रायत्वा जुष्टं गृह्णा
मीति प्रथमम् दशापवित्रसंमृष्टं सादयेद्योनिनाम्खरे एष
घते योनिरिंद्रायत्वा जुष्टतमं अप्सुषदं वा घृतसदं० इंद्रा
त्वा जुष्टं गृह्णामीति द्वितीयं दशापवित्रसंमृष्टं सादयेद्यो
निनाम्खरे एषते योनिरिंद्रायत्वा जुष्टतमं पृथिविसदं
त्वांतरिक्षसदं मीति तृतीयं अपां रसामिति चतुर्थं ग्रह
ऊर्जो कृत्वा इति पंचमे ५ ततोपरान्समादश ग्रहान्गृह्णाति
धारात उपगृहीतोसीति यो जिनस्तं दशापवित्रेण दशा
पवित्रसंमृष्टं तदेव च नेष्टाग्न्यध्वर्युरौंके कास्मिन्गृहीतेन्तु
राष्ट्रत्या त्रेस प्रदश स्त्राग्रहान्गृह्णाति उपयामगृहीतो
सीति संगृह्य तत्र अध्वर्युरुपर्युपर्यधं नयति नेष्टात्वयो
धौदं च अध्वर्युरागत्य स्यापश्चान्तां यंत्रे ग्रहा० नेष्ठाचाग्न
स्य पुरस्तादिति तथा नातिक्रमणं कार्यं ताभ्या अत्रस्थावेकप्रविश्टेति
यत्काष्ठं तत्राध्वर्योर्नेष्टुश्चोपर्यधस्थधारतोमंत्रः सुष्टचौस्थ संमाभद्रे
नाग्पृड०मिति अत्राहरणे चोभयोर्मंत्रः विष्ट्वौस्त्वो विमापापमना हृडु०
इति नेंमृजय ष्टवी परस्वरसादनेचिवए तन्तेयोनि सादयामीति ततो

ध्वर्युर्हिरण्मयपात्रेणमधुग्रहं गृह्णातिस्वरेण सादयति मधुनश्चात्र
देवत्वान्नोपयामयोनी ततउच्छ्रयादिग्रहणामाग्निष्टोमवत् ततोमाहि
पवमानानंतरं अग्नीदग्नीन्विहरेत्यादौ प्रतिप्रस्थाता पशुभिश्चरंति
नामवाजपेयी विद्याकरादिमंते एवमनेन पशुमेहीत्येव तत्ते यर मिश्र
स्त्वेवमेवमन्यंते चित्स्यविहरणादिव पामार्जनांतोविशेषः यूपपरि
वीयातिराज्ञ्यपशूनुपाकरोति यथाग्नेये द्वाग्नौ छागानुपाकृत्यैन्द्र
मेषमनुपाकरोति वशावध्या पृश्निश्चित्रा एकप्राश्नवेदपृश्निमायी का
लोत्तुगोपशोनिषिद्धात्तत्स्थानेमेष्यालंभः प्राजापत्यांश्चप्रपामां
स्तूपरान्वत्ताक्षान्सप्तदशपशूननुपाकरोति तूपराः शृंगोत्पत्तिकालेप्य
जातशृंगाः वत्ताक्षाः प्रतिप्रजननसमर्थाः एके षोडशपशून्प्रजा
पतयश्चालभ्यसप्तदशंवाचश्चालभंते सर्वेषांवासहप्राधान्यमभ्यं
ति पृषदाज्य ज्ञुदातः स्युः तत्र प्राजापत्यानामेवोपाकृत्वं न्येषां प्र ना
धानि च सप्तदश प्रधानकर्माणि ते नैकस्यापिवैगुण्येनसर्वावृ
त्तिः एकदेवत्यत्वात्तु [illegible] देपः ततएकचपशुपुरोडाशस्यैक
स्यैवसर्वोपकारकत्वं प्रयाजानूयाजभागवत् अत्रचसर्वेषांपशूनांपदार्था
नुसमयो नकाराड्यानुसमयः यथासर्वेषामेकत्रोपाकरणं ततो
मंथनं प्राकलापदानाद्यामिहोमांतं उपाकरणामंस्यतयो वैकल्पिकत्वेण
त्रनियमः श्रुतिस्तत्र योक्तत्वात् तथाचमधुकरश्चान्विवास्देवैः
स्वग्रंथेनिरूपितत्वाच्च अतःसर्वेषांप्रधानाभिः [illegible] पर्न
ततोदेवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्यां अग्नयेजुष्टंनियुनज्मि
अनेनमंत्रेणाग्नेयंयूपवत् इन्द्राग्निभ्यांजुष्टंनियुनज्मीति ऐन्द्रा

ग्नमाग्नेयगलेव ध्नाति २ ततइंद्रायजुष्टं नियुनज्मीत्यैंद्रंमेषं॰ ऐंद्राग्न
गले ३ ततःसरस्वत्यैजुष्टमिति छागं॰ मेषीवा॰ ऐंद्राग्ने गले ४ ततो
मरुद्भ्यऊर्जेषेभ्योजुष्टमिति॰ सारस्वत॰ गलै॰ वशां ५ ततः प्रजापतयइति
प्रजापत्यं॰ मारुतगलेनिबंध्नतेयरस्मे बंगलगलिकतयासप्तदशानामपि
२२ नचेजुष्टमिति॰ मंत्रमस्यवायोऽ प्राम प्राजापत्यगलेवं धनं ततोऽद्भ्य
स्त्वोषधीभ्यः॰ संप्रूक्ष्य अग्नत्वाजुष्टं प्रोक्षामीत्याग्नेयनः प्रोक्षणं १
इंद्राग्निभ्यांत्वेत्यैंद्राग्नस्य २ इंद्रायत्वेंद्रस्यमेषस्य ३ सरस्वत्यैत्वेति॰
सारस्वतस्य छागस्य॰ मेष्यावा ४ ततोमरुद्भ्यऊर्जेषेभ्यस्त्वेतिवशायाः ५
ततः प्रजापतयेत्वेति प्रत्येकं सप्तदशप्राजापत्यानां सप्तदशस्ववाचेत्वेति।
वा॰ यथानियोजनंप्रोक्षणं होतुः सप्तदशसामिधेन्येत्यादिहोतुःप्रयो
गावसरेस्माभि॰ प्रोक्तं ततमंजनं तेनैवक्रमेणललाटोपस्पर्शनंच
आग्नेय्यादिवशांतानां प्राजापत्यानांचयुगपदुद्धृयनंक्रमेण च
तुश्चत्वारिंशत्तत्स्तरणान्यादत्ते॰ एकैकंप्रतिपशु ततस्तरणं॰ निधानादि
संज्ञपयान्वगमान्निनिधेव॰ सर्वेषां संज्ञप्ताः पशवइतिप्रशमितुः परिप
श्वाकृतिस्तंत्रेण सर्वेषां माहिर्भूर्ति माप्रदाकुरितिनियोजनीयातांः
प्राशनं आग्नेयैंद्राग्नेंद्राणांसारस्वतस्यवशायाः प्राजापत्यांचतत्त
त्वेष्ठप्राणानांप्रोक्षणंक्रमात् ततः पश्चात्निषेकान्तरंस्तरणानि धान
नाभिछेदनंस्तरणाम्मूलानामुत्तरंस्तरणान्मस्य सव्यहस्तकरणं॰ एवंसर्वेषां
ततस्तरणाम्मूलानां निरसनंनिरस्तं रक्षइति क्रमेण वपोद्धरेद
नपरिवासने॰ सरस्वत्यामेषीपदे॰ अन्येवपाश्रपणयो गोपशोःक
लावभावेमरुद्भ्यऊर्जेषेभ्योमेषीतस्यावपा॰ सारस्वत्यामेष्यावशाम्न १४

परायां शेरस्यते यदित्साररस्वती मेषीत्तदामाकृत्वा एवात्येवपाश्रप
रायोभवतः प्राजापत्यवपातां आग्नेयवपाश्रपरायोरेवप्रोर्ध्वं स
र्ववपानां चात्वालवसेकः शमित्रेघृतपनं द्वाविंशतिरशनाग्रप्रासने
प्रतिप्रस्थातुः श्रपरणां सर्वासां प्रत्ताः प्रचरेति प्रैषः पृथक्‌ पा
त्रेषु कृत्वा प्रासादानं आग्निंगच्छेत्याग्नेयवपायाः १ इंद्राग्नीगच्छ
२ इंद्रंगच्छ ३ सरस्वतीगच्छ ४ मरुतउत्तेयान्गच्छ ५ प्रजापतिंग
च्छ ६ वाचंगच्छवा ७ सर्वासांक्रमेणासादनं क्रमेणालंभः तत्रा
ग्नेययागः अग्नये छागस्यवपायैमेदसोनुब्रूहि॰ वपांमेदः प्रास्थितं
प्रेष्येतिप्रैषः इंद्राग्निभ्यां छागवपांमेदः प्रस्थितंप्रेष्य॰ इंद्रायमेष
स्यवपायैमेदसोनुब्रूहि॰ इंद्रायमेषस्यवपांमेदः प्रस्थितंप्रेष्यसरस्वत्यै
छागस्यवपायैमेदसोनुब्रूहि सरस्वत्यै मेष्यावपायैमेदसइत्यादिवा सरस्वत्यै
छागस्यमेष्यावावपामेदः प्रस्थितंप्रेष्य एवंयागंकृत्वाक्षत्रवशायाः
प्रचारः माहेंद्रग्रहांतेवाभविष्यति अत्रचेत् मरुद्भ्यउत्तेभ्यउस्रा
यावपांमेदः प्रस्थितंप्रेष्य कलौगोमेध्याप्रतिनिधानेपिप्राकृतात्त्वे
वमंत्राणांशब्दाः॰ नरूपत्वात्प्रतिनिधेः॰ प्रतिनिधिरपीतिन्यायश्च
गोवाचकशब्दोस्यादिप्रकृतशब्दप्रयोगएव अथ प्राजापत्यानां
अत्रवावपाप्रचारः वामदेवग्रहांतेवाभविष्यति अत्रचेत प्रजाप
तये उपांशुमनसा॰ छागानांवपायैमेदसोनुब्रूहि॰ इत्युच्चैः जुहोत्यु
पत्तीर्याहिरण्यशकलमवधायद्विरभिघार्यांतिक्रम्याश्राव्यप्रत्याश्रा
वितआह प्रजापतये॰ इत्युपांशु॰ छागानांवपामेदः प्रस्थितंप्रेष्येत्यु
च्चैः सप्तदशस्यपशोर्वादेवत्वपक्षे॰ वाचे छागस्यवपांमेदः प्रस्थि

क्रतु १५ तं प्रैष्य माहं प्राते वाव शावपाप्रचारपक्षे विशेष उच्यते वशावदानानि ५प्राति
१५ जौहववि भागा अभिन्नपात्रेपच्यन्ते सौविष्टकृतानि त्र्यैयम्बकानि अं
गानि पृथक्पात्रे पच्यन्ते तदा स्वकाल एव प्रधान जौहवावदानयागः
जौहवेभ्य एव च स्विष्टकृदं तेभ्यं अंगानि विशेषस्त्वप्रजायेद्दाति स्वकाले वा
प्राकृते वशावपाप्रचारः तस्मिन्पक्षे त्र्यंगानां पृथक्पचनं अवदानं च
तदा विशेषो प्राजापत्य वपानां हविषां च वैकल्पिकः कालविशेषः मैत्रा
वरुण प्रैष्यावसाने वामदेव्यग्रहहोमान्ते प्राजापत्यवपाप्रचारः स्रुग्व्यू
हनात्प्राक् हृदयादि प्रधान हविषां प्रचारः तदन्तु सौविष्टकृत प्रचारः
प्राकृतकाल एव वा प्राजापत्यवपाहविषः प्रचारः वपामार्जनादि प्रकृ
तिवत् नाराशंसभक्षणं वैश्वदेवग्रहणासादनात् द्रोणाकलश
स्य सकलस्य पृक्तस्य पूतभृत्यासेकः अदाभ्याद्रोणाकलशनि
धानं न इ?पर्यैकत्रोदशापवित्राणि धानामित्यादि प्रकृतिवत् आ
ग्नेयीत्यग्निपुरोडाशपूर्वकं सवनीयास्सवनीयान्निर्वपन्नू दंते ?
नैवारं सप्तदश शराव बार्हस्पत्यं चरुं निर्वपति नीवाराक्त?साधा
न्यानि शरावः पात्रविशेषः तयान्त्रिका नियमदर्शनान्न्याद
शाहृत्पात्र माहुः तद्भूभीर्यं च प्रायः प्रादेशार्ध्वेन कलशा? कार
दित्य त्वात् तत्र प्रकृति निवृत्ति देशा? ? चरुः संख्यानुग्रहार्थं मुष्टित्वोप
तापि सपादचरुः शरावपितन्या?चरुः हुत्वाग्रहान्सप्तदशश
राव ओदनो निष्पन्नो भवति आनिदेशिकी संख्या वाचा ग्रही
ता भवति मुष्टिलोपस्त्वावशाद्धः तत्र वाचस्पति प्रैषाद्याः ओद
कदानं नो विशेषः प्रणीताः संत्येव पात्रासादने अपि अग्निहोत्र हव १५

णी कर्परंकपालानि द्वश्रीणि· सन्नसन्नक्षिर्वा·यादि नुवाचेनसन्नदश:
पञ्चत्तदा चतु:सन्नातिकन्नसन्नातिर्वा उलूखलादिमुसलेशाम्याद्दृषदुप
लपात्र्य:पांशुकेषुसंमाने अनष्वेन्तन्न प्रागुवापवेषाडपसर्जनीपात्रं
पुरोडाशपात्र्योवाक्यदेसन्न·अत्यप्यायेन·पचविलावा:प्रतान्नावदान
मीक्षधंयवा: नीवाराश्चश्राशित्रहरयोत्तेएव पूर्णपात्रकर्मापवर्गाच
त्तएव उपकल्पनीयानि· महतीचरुपात्रीकरंभार्थलौकिकं दधि मूर्ध
ग्नि होत्रहवराया दानादि पात्रीकिलजपांनेकृत्वा·नानावीजित्वाष्टथगवे
क्षरणां युगपदपद्रव्यनिरास: पृथगभिमर्शवापद्रव्याभावे जलस्या
र्शः पृथगघविष्णालंभनं अग्नयेजुष्टंगृह्णामि तथेंद्राग्निभ्यांजुष्टं।
इंद्रायजुष्टं ३ सरस्वत्यैजुष्टं ४ मरुद्भ्यउजेषेभ्योजुष्टं ५ प्रजापत
येजुष्टं ६ पदेवाचेजुष्टं ७ ततः सवनीयानां इंद्रायजुष्टमिति७।
रौडाशार्थे ८ इंद्रायहरिवतेजुष्टमितिपात्रेरान्चर्वर्थनीवाराणां
ग्रहणं १ पृथकुशेषाभिमर्शनं सादनान्तेकृत्वा·स्थितपवित्राभ्यां
प्रणीताभ्यः प्रोक्षणी:संस्कृत्यव्रतानुज्ञयापृथग्घवि:प्रोक्षणं अग्न
न्येत्वाजुष्टंप्रोक्षामीति १ ततइंद्राग्निभ्यांत्वा २ इंद्रायत्वा ३
सरस्वत्यैत्वा ४ मरुद्भ्यउजेषेभ्यस्त्वा ५ प्रजापतयेत्वा ६ पदे
वाचेत्वा ७ ततः सवनीयानां इंद्रायत्वा ८ इंद्रायहरिवतेत्वा ९
इंद्रायपूषण्वतेत्वा १० बृहस्पतयेत्वेति ११ ततःकृष्णाजिनोलूख
लमुसलधूर्पपिवेषकर्परकपालानिप्रोक्ष्य·उपसर्जन्यादीनांप्रोक्षणं अ
प्रोक्षणानिःशेषणं ततः कृष्णाजिनादानादिफलीकरणांतेव घातः
तत्रहविरावापमुसलयोजनहविरुद्वपनविवेकीकरणानिमंत्रवंतिपृथ

कृ॰ तथानिरसनादित्तंत्रेणाश्लेयं अंतेवाग्विसर्गः एकैकस्यविवेकी
करणांतेपात्र्यामोप्यतंत्रेणाभिमर्शनंफलीकरणात्पूर्वंनिर्दिष्टोधा
नाकरंभार्प्यनां अन्येषांतुफलीकरणांते फलीकरणांतःपृथक्
करणानांतुप्रातःसवनिक॰ करोभुरद्वत्तां अथकपालोपधानं
आग्नेयोष्टाकपालः १ ऐंद्राग्नोद्वादशाकपालोदशोद्दिष्टत्वात् २
एकादशाकपालःसवनीयेष्वदृष्टत्वात् ३ सारस्वतोष्टाकपालः
४ मरुद्भ्यउज्जेषेभ्यःसप्तकपालोद्वादशाकपालोवा चातुर्मास्येएका
दशिरायांचतत्याज्ञ्याद्दर्शितात् ५ प्राजापत्योद्वादशाकपालश्च
यनेदृष्टत्वात् ६ वाचेष्टाकपालःपत्ते ७ सवनीयऐंद्रएकाद
शाकपालः ८ कर्परोपधानं प्रथमकपालवदधस्तादङ्गावर्जमुप
रिनुस्यात्तस्मांगारः चरुस्थानकल्पनं अंगारैःकपालाभ्यूहननं॥
इतिश्रीक्रतुपद्धतिसमाप्तम् श्रीमस्तु ॥ ॥ ॥
संवत् १८८४ वैशाखव॰ १५ लि॰ साधुरामलिखारीमं॰ श्रीरघुनाथजी